Shri Raghunatha Temple MSS. Library,
JAMMU

No. ४७२४

Title शौनकोक्त एकदण्डीसन्यासविधिः

Author ×

Extent १९ पत्राणि Age सं. १७९७

Subject वेदान्तः

शौनकोक्तैकदण्डिसंन्यासविधिः

एपुस्तकत्रिासविनाद्दत्तगदाधरनुछेपत्र १५॥ सन्यासविधिः।

पद्धतिः

श्रीगणेशाय नमः ॥ अथ परमहंसानां संन्यासविधिं
व्याख्यास्यामः ॥ अनयज्ञतपोदानहोमस्वाध्याय
वर्जितः शौचाचारपरिभ्रष्टं संन्यासं नैव कारये
त् ॥१॥ आरूढपतितापत्यं कुनखी श्यावदंतकः ॥
क्षयहतांगविकलो न च संन्यासमर्हति ॥२॥ कुष्ठी चै
व तथा कुब्जः षंडो वामनकमेव च ॥ अंधं पंगुं च ब
धिरं संन्यासं नैव कारयेत् ॥३॥ संप्रत्यवसितानां ॥१॥
च महापातकिनामपि व्रात्यानामभिशस्तानां
संन्यासं नैव कारयेत् ॥४॥ तत्र कृच्छ्रांस्तु चतुरः
कृत्वा पावनार्थमनाश्रमी ॥ आश्रमी चेत तप्तकृ

ह्यं तेनासौभाग्यतांव्रजेत्। चरेच्चत्वारि कृच्छ्रा
णि न्यासं कुर्वीत नाश्रमी। आश्रमी कृच्छ्रमेकं तु
कृत्वा संन्यासमर्हति। अथशौनकप्रोक्तं संन्या
सविधिं व्याख्यास्यामः। तत्र नांदीमुखं श्राधं कु
र्यात्। प्रथमं सत्यवसुसंज्ञिका विश्वेदेवाः। तदन
तरं देवताद्यष्ट श्राधानि। प्रेतेमातामह श्राधं च।
तत्र सर्वत्र प्रति वर्गयुग्मं कृत्वा। ब्राह्मणा नामंत्र
येत्। देवश्राधे देवतात्रयं। ब्रह्मा विष्णु महेश्वराः।
ऋषिश्राधे देवतात्रयं देवर्षि ब्रह्मर्षि राजर्षयः। दिव्यश्राधे देवतात्रयं। सनक सनंदन सनात

२

नाः अनन्तश्राद्धे देवतात्रयं। पृथिव्यादि नियं च मङ्ग
ळतानि। चक्षुरादीनि एकादशेन्द्रियाणि। चतुर्वि
धमनन्तग्रामाः॥ एतेन गोत्राः॥ पितृश्राद्धे देवता
त्रयं। पितृपितामहप्रपितामहाः। गोत्राः। मातृश्राद्धे
देवतात्रयं। मातृपितामहिप्रपितामह्यः॥ आत्म
श्राद्धे देवतात्रयं। आत्मपितृपितामहाः। मातामह ॥२॥
श्राद्धे देवतात्रयं। मातामहप्रमातामहवृद्धप्रमाताम
हाः। प्रतिवर्षे पिंडत्रयं दद्यात्॥ इति प्रतिप्रयोगः॥ अ
थवक्तोदं तथा वनं कृत्वा। तीर्थे गत्वा नित्यस्नाना
दिकं कृत्वा। पिंडस्थाने संमार्जनं कृत्वा। निमंत्रिता

ब्राह्मणेनाहूय। पादौ प्रक्षाल्याचम्य। प्राङ्मुखो
पविश्य। श्रीहरिस्मरणपूर्वं प्राणायामं कृत्वा।
अद्यादि प्रयोगश्रवणं कृत्वा। संन्यासांगभूतं
नांदीमुखश्राधमहं करिष्ये इति संकल्प्य। पादप्रक्षा
लनादि कृत्वा। उपवीती भूत्वा। अत्र ते देव कु
र्वीत। वेतालाश्च पिशाचाश्च राक्षसाश्च सरि
सृपाः। अपसर्पन्तु ते सर्वे यावच्छ्राधं करोम्यहं।
इति भूमिशोधनमंत्रः। अथाप उपस्पृश्य।
उदगग्राणि मंडलानि कृत्वा। तानभ्यर्च्य।

सत्यवसुरुद्रादित्यसंज्ञिकाविश्वेदेवार्थेनव
स्त्रांप्रसादनीयइति।द्वौब्राह्मणौ॰आमंत्र्य।च
तुर्थ्यंतप्रयोगः।देवार्थेब्राह्मणान्षडितिउत्त
मपक्षः।अथवाविश्वेदेवार्थेद्वौ।देवतार्थेब्रा
ह्मणत्रयंइतिमध्यमपक्षः।अथवायथाशक्ति
पर्यमाणयावत्संभवस्तावद्विधिः।इतिकनिष्टप ॥३१।
क्षः।इतिप्रकारत्रयंवर्त्तते।कालदेशसमयो
विचारणीयः।प्रयोगः।संबोधनांतः।गोत्रि
णांपितृस्वश्राद्धेक्षणप्रसादनीयइति

कर्त्तास्त्वनेके प्रतिपार्वणे पृथक् । आसनगंधपुष्प
धूपदीपनैवेद्य । अक्षतोदकादिकं पूगीफलादिकं
स्वस्त्रवासांसि स्नानं । अर्घादिप्रयोगः । एवं प्रका
रेण । अष्टौ श्राधानि । अंते मातामहः प्रतिपा
र्वणं । सर्वं पृथक्करणीयं । तस्यानुक्रमणि ज्ञापव
यनीयं । प्रथमे पार्वणे देव श्राधे विश्वेदेवाः स
त्यवसुसंज्ञिकाः अर्थे ब्राह्मणद्वयं । पितृस्वरूपे देव
तार्थे ब्राह्मणत्रयं । नामब्रंम विष्णु महेश्वराः । पू
र्ववद्विधिविधानेन कर्त्तव्य इति । प्रथमपार्वणं । नगो

त्राः। द्वितीयपार्वणे ऋषि आधे विश्वेदेवा पूर्ववं दे
वताचयं देवऋषि ब्रह्मर्षि राजर्षयः। नगोत्राः। तृ
तीयपार्वणे दिव्य आधे विश्वेदेवा पूर्ववं देवतात्रयं
वसुरुद्रादित्याः। नगोत्राः। चतुर्थपार्वणे मनुष्य
आधे विश्वेदेवा पूर्ववं देवतात्रयं। सनकसनंदन ॥५॥
सनातनं। नगोत्राः। पंचमपार्वणे। भूत आधे विश्वे
देवा पूर्ववं देवतात्रयं। पृथिव्यादिमाहाभूता नि।
चक्षुरादीन्द्रियाणि। चतुर्विध भूत ग्रामाः। नगोत्राः।
षष्ठपार्वणे। पितृ आधे विश्वेदेवा पूर्ववं देवतात्रयं।

पितृपितामहप्रपितामहाः।गोत्राः।सप्तमे पार्वणे
मातृश्राद्धे विश्वेदेवा पूर्ववृं मातृत्रयं।मातृपिताम
हीप्रपितामह्यः।गोत्राः।अष्टमे पार्वणे।आत्मश्रा
द्धे विश्वेदेवा पूर्ववृं देवतात्रयं।आत्मपितृपितामं
हाः।गोत्राः।नवमे पार्वणे।मातामहश्राद्धे विश्वेदेवा
पूर्ववृं देवतात्रयं।मातामहप्रमातामहवृद्धप्रमाता
महाः।गोत्राः।तथा आत्मपिंडे संयोजनं।आत्मा
ऽन्तरात्मा परमात्मा।इति।गोब्राह्मणाः मम सं
न्यासनिमित्तं नांदिमुखश्राद्धं सर्वे परिपूर्णमस्तु।

यस्यस्मृत्याच नामोक्त्या तपोयज्ञक्रियादिषु। न्यू
नं संपूर्णतां याति सद्यो वंदे तमच्युतं। यन्यूनाति
रिक्तं सर्वं परिपूर्णमस्तु। एवं प्रतिपाद्यैतत्क
र्म समाप्य दक्षिणां दत्वा। क्षमार्थं किंचिद्द्रव्यं र
क्षणीयं। अपरं गुरवे निवेदयेत्। अर्धं प्राणे। शरी
रं सर्वं गुरुभ्यो निवेदयेत्। प्रायश्चित्तं न दद्या ॥५॥
च्चेत् मच्चेतन्मनि जन्मनि। इति संन्यासविधिव
चनं। पादप्रक्षाल्याचम्य। प्राणायामं श्रोत्रवंदनं
कृत्वा। श्रीहरिस्मरणं। पुण्याहं वाचयित्वा। ब्रा

स्नाणइतिश्राधविधिः समाप्तः ।=अथ पश्चाधांते समग्र
केशान्रश्मवपनं। कक्षोपस्थवर्ज्जं नखनिःकृंतनं
कृत्वा। पश्चात्समुद्रं वैणवंदंडं संन्निधाय्य। तत्रदं
डसंस्कारः।=अष्टोत्तरशतनशंखोदकाभिषेचं कृ
त्वा। प्रणवेन पुरुषसूक्तेन च। देवायतने नदीति
रे गवां गोष्ठे=अरण्ये वा स्वच्छ समीपे हरि स्मरण
पूर्वकं एवं वदेत्। धन्योऽहं कृतकृत्योऽहं सौभाग्योऽहं
धरातले।=अघमेत्यक्तसंसारो विष्णुमायावि
मोहितः। इति मनसा विचारणीयं। गुरुसमीपे
गत्वा नमस्कृत्य दंडवद्भूमौ पतित्वा। एतद्वाक्यं ब्र

वीत्। ओ स्वामिन् नरकान्मां समुद्धृत्य त्वं हृता
र्थं कुरु। ततः पश्चात्पादप्रक्षालनं। आचमनं श्रो
त्रवंदनं। अघादिप्रयोगः। संन्यासनिमित्तं सं
ध्यावन्दे अहं करिष्ये। तत्पूर्वं मानसं ब्रह्मांजलिं
कृत्वा जपेत्। ओ ब्राह्मणाः। संन्यासार्थं मया ५
श्राधं कृतमेतद्द्विजोत्तमाः॥ अनुज्ञां प्राप्य यु ।६॥
ष्माकं सिधिं यास्यामि शाश्वतीं। गर्भवासभया
द्भीतः तापत्रयात्तथैव च। गुरुं प्रवेष्टुमिच्छामि प
रं पदमनामयं। अं ब्रह्मणे नमः। ओं विष्णवे
नमः। अं कालाग्निरुद्राय नमः। अं प्रजापत

य नमः। ॐ सूर्यात्मने नमः। ॐ सोमाय नमः। ॐ आत्मने
नमः। ॐ अंतरात्मने नमः। ॐ परमात्मने नमः। ॐ
ज्ञानात्मने नमः। इतिमान् सप्तपुष्पांजलिं जपेत्। अथ
सक्तुमुष्टि त्रयं प्राशनमंत्रः। ॐ आत्मने स्वाहा। ॐ अं
तरात्मने स्वाहा। ॐ परमात्मने स्वाहा। ॐ प्रजापत
ये स्वाहा। इति प्राश्याचम्यात्तेरेव नाभिमनुमंत्रयेत्।
ततः पयोदधिसर्पिर्भिः प्राशनमंत्रः। ॐ प्रजाप
तये स्वाहा। ॐ इंद्राय स्वाहा। ॐ ब्रह्मणे स्वाहा। इति
मंत्रः। त्रिः प्राश्याचम्य। इति नाभिमनुमंत्रयेत्। इ
ति संध्यावृषभस्मानं। ततो अस्तमिते आदित्ये। स्व
गृह्योक्तविधानेन अग्निमुखं कृत्वा। ॐ प्रजाप

नयेस्वाहा। ॐ इंद्रायस्वाहा। ॐ अग्नयेस्वाहा। ॐ
सोमायस्वाहा। सायंसंध्याविधिवदुपास्य। पूर्व
वद्भाग्पितानौचरुंश्रपयित्वा। आघारावाज्य
आज्य भागौतन्त्रहोमः। ॐ प्राणायस्वाहा। ॐ अपानाय
स्वाहा। ॐ व्यानायस्वाहा। ॐ उदानायस्वाहा। ॐ
समानायस्वाहा। ततः समिदाज्यचरुभिः पुरुषसूक्ते ॥७॥
नचरुंहुत्वा। स्विष्टकृतंकृत्वा। व्याहृतिभिः पूर्णा
हुतिंकृत्वा। अग्नेरुत्तरतोदर्भेनास्तीर्य। कृष्णाजि
नंच। अंतर्ध्यानेनभगवच्चिंतनं। गायत्रींजपेत्।
इतिप्रथमरात्रिकर्म। ततोब्राह्मेमुहूर्तेचोत्थाय।

विरजाहोमं कुर्यात्। पूर्ववत्तु अग्निमुखं कुर्या
त् विधिवत्। प्राणापानव्यानोदानसमा
ना मे शुध्यंतां ज्योतिरहं विरजा विपाप्मा भूया
सं स्वाहा॥ इदं प्राणापानव्यानोदानसमाने
भ्यो न मम॥ वाङ्मनश्चक्षुश्रोत्रजिह्वाघ्राणरे
तोबुध्याकूतिसंकल्पा मे शुध्यंतां ज्योतिरहं
विरजा विपाप्मा भूयासं स्वाहा। वाङ्मन
श्चक्षुश्रोत्रजिह्वाघ्राणरेतोबुध्याकूतिसंक
ल्पेभ्यो इदं न मम। त्वक्चर्ममांसरुधिरमेदो

मज्जास्नायवोऽस्थीनी मे शुध्यंतां ज्योतिरहं वि
रजा विपाप्मा भूयासं स्वाहा त्वक्चर्ममांसरुधि
रमेदोऽस्थिमज्जास्नायुभ्योऽहं स्वमममाहं शिरःपाणि
पादपार्श्वपृष्ठोरूदरजंघाशिश्नोपस्थपायवो मे शु
ध्यंतां ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा ॥८॥
शिरःपाणिपादपार्श्वपृष्ठोरूदरजंघाशिश्नोपस्थपा
युभ्योऽहं मम उत्तिष्ठ पुरुष हरितपिंगललोहिता
क्षि देहि ददापयिता मे शुध्यंतां ज्योतिरहं वि
रजा विपाप्मा भूयासं स्वाहा उत्तिष्ठ पुरुष

हरितपिंगललोहिताक्षिदेहिदेहिददापयितृ
र्यइदंनममा॥पृथिव्यापस्तेजोवायुराका
शामेशुध्यंतांज्योतिरहंविरजाविपाभ्मास्या
सं८स्वाहा॥पृथिव्यापस्तेजोवायुराकाशेभ्य
इदंनममा॥शब्दस्पर्शरूपरसगंधामेशुध्यं
तांज्योतिरहंविरजाविपाप्मास्यासं८स्वाहा।
शब्दस्पर्शरूपरसगंधेभ्यइदंनममा॥
मनोवाक्कायकर्माणिमेशुध्यंतांज्योतिरहंविर
जाविपाभ्मास्यासं८स्वाहा।मनोवाक्कायकर्म

ण्यइदंनमम।८।।ऽव्यक्तभावैरहंकारैर्ज्योति
रहंविरजाविपाप्माभूयासःस्वाहा।ऽव्यक्त
भावैरहंकारैरिदंनमम।९।ऽआत्मामेशुध्यंतां
ज्योतिरहंविरजाविपाप्माभूयासःस्वाहा।
ऽआत्मनेइदंनमम।१०।ऽअंतरात्मामेशुध्यंतां ।।८।।
ज्योति०ऽअंतरात्मनेइदंनमम।११।परमात्मामे
शुध्यंतांज्योति०परमात्मनेइदंनमम।१२।क्षुधे
१ स्वाहा।इदंक्षुधेनमम।१३।क्षुत्पिपासायस्वा
हा।क्षुत्पिपासायइदंनमम।१४।ऋग्विधाना
यस्वाहा।इदंऋग्विधानायनमम।१५।यजुर्विधानायस्वाहा।

यजुर्विधानायइदंनमम। सामविधानायस्वाहा।
सामविधानायइदंनमम। अथर्वविधानाय
स्वाहा। अथर्वविधानायइदंनमम। शाखोक्ताय
स्वाहा। शाखोक्तायइदंनमम। उपनिषद्विधाना
यस्वाहा। उपनिषद्विधानायइदंनमम। क्षुत्पिपा
सामलाज्येष्ठा अलक्ष्मीर्नाशयाम्यहं। अभूति
मसमृद्धिंचसर्वाणिर्नुदमेपाप्मानः स्वाहा।
क्षुत्पिपासामलाज्येष्ठा अलक्ष्मीर्नाशनाय
अभूतिमसमृद्धिंसर्वंमिइदंनमम। अन्नमय

५ गावो हिरण्यं धनमन्नपानं सर्वेषां श्रियै मे स्तु ध्यं तो ज्योति०॥

प्राणमयमनोमयविज्ञानमय आनंदमयह
र्षमयसत्यमय आत्मा मे शुध्यं तां ज्योतिरहं
विरजा विपाप्मा भूयासं स्वाहा अन्नमय
प्राणमयमनोमयविज्ञानमय आनंदमय
हर्षमयसत्यमय आत्मभ्य इदं न मम गावो ॥१०॥
हिरण्यं धनमन्नपानं सर्वेषां श्रियै इदं न म
मा इति आज्यं होतव्यं त्यागं कुर्यात् ततो वि
श्वेभ्यो देवेभ्यः स्वाहा विश्वेभ्यो देवेभ्य इदं न मम
कषोल्काय स्वाहा कषोल्काय इदं न मम ३

तिष्ठपुरुषदक्षिणलोहितपिंगलाक्षीदेहिदेहिदद
पयितामे श्रुध्यंतांज्योतिरहंविरजाविपाप्मो भूयास
ंस्वाहा।।उत्तिष्ठपुरुषहरितलोहितपिंगलाक्षिदे
हिदेहिददापयितेभ्यइदंनमम।।ॐइंद्रायस्वाहा।।ॐ
प्रजापतयेस्वाहा।।ॐविश्वेभ्योदेवेभ्यःस्वाहा।।ॐ
ब्रह्मणेस्वाहा।।ॐविष्णवेस्वाहा।।ॐरुद्रायस्वा
हा।।ॐसोमायस्वाहा।।ॐसूर्यायस्वाहा।।ॐसर्व
योत्मनेस्वाहा।।प्राणाहिपंचाकुतीकृत्वा।यथाकु
तिस्तथात्यागः।।यथाविधइति।पुरुषसूक्तेन

प्रत्यर्चे=आज्यकुत्वा।स्वगृह्योक्तविधानेनस्विष्ट
कृत्।इत्यादिसर्वकर्मसमाप्य।पश्चात्पुरुषसूक्ते
जपित्वा।तदनंतरं।ॐनमोब्रह्मणेनमोस्त्वग्नये
नमःपृथिव्यैनमःओषधीभ्यः।नमोवाचेनमोवा
चस्पतयेनमोविष्णवेमहतेकरोति।इतिमंत्रंज ॥११॥
पित्वा।उपस्थानंकुर्यात्।=आत्मन्समामुपह्वायग
मः।=अहंत्वामुपह्वायगच्छामि।समास्सिंचंतुम
रुतः।समिंद्रःसबृहस्पतिः।समायमग्निःसिंच
तु।=अग्निरात्मनिसमारोपयामि।=अग्निः=आ

त्मान्निमध्ये॥ आगच्छतिष्ठसन्निहितोभव।सन्निरु
द्धोभव॥ अत्राधिष्ठानंकुरु इतिमंत्रः। ततोमुखं
विस्तीर्य॥ अग्निंसमारोपयेत्। इतिविरजाहोमः स
माप्तः॥ ततोऽग्निःसमारोप्यानंतरं ब्राह्मेमुहू
र्त्तेउच्छायदंतधावनपूर्वकं तीर्थंगत्वा।स्नानसं
ध्यावंदनंकृत्वा।जलसमीपेस्थित्वा॥ अद्यादि
प्रयोगंपठित्वा॥ अहं सन्यासंकरिष्यामीतिसं
कल्प्य।नाभिप्रमाणेजलेस्थित्वा।गायत्रीमावि
शामि। ओंभूःप्रविशामि सावित्रीमि।तत्सवितुर्वरे

एयं ओं भुवः सावित्रीं प्रविशामि। भर्गो देवस्य धी
महि। ओं स्वः सावित्रीं प्रविशामि धीयो यो नः प्र
चोदयात्। ओं भूर्भुवः स्वः सावित्रीं प्रविशामि।
तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि॥ धियो यो
नः प्रचोदयात्। परोरजसे सावदों। संवेत्य त्वा ॥१२॥
जलमध्ये स्थितो। आत्मानं प्रणवं ध्यायेत्।
इत्युक्तं। पुत्रैषणायाश्च वित्तैषणायाश्च लोके
षणायाश्च तथैव च। सर्वैषणाविनिर्मुक्तो या
स्यामि पदमव्ययं। इत्युक्त्वा आत्मा मध्ये परमा

12

नंद्दविचिंतयेत् । पश्चात्तत एतन्मंत्रं । ॐ भूर्भुवः स्वः
शिखायज्ञोपवीतं जुहोमि स्वाहा । ॐ भूर्भुवः स्वाहा स्वः
ति । ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धि
यो यो नः प्रचोदयात् । ॐ परोरजसे सावदों । शिखां
जुहोमि स्वाहा । इत्यनेन मंत्रेण प्रक्षुज्जेषु जु
हुयात् । शिखासूत्रं । ॐ भूर्भुवः स्वः प्रनयं सर्व
भूतेभ्य समत्वाय इति जलांजलिं क्षेपयित्वा । त
तो जलमध्ये वस्त्रादिकं त्यक्त्वा । उदङ्मुखो नग्नो
भूत्वा । पंचसप्तपदानि गच्छेदिति । ॐ भूः सन्य

स्तंमया। ओं भुवः सन्यस्तं मया। ओं स्वः सन्यस्तं म
या। ओं भूर्भुवः स्वः सन्यस्तं मयेति त्रिर्मंद्रं त्रिर्म
ध्यं त्रिरुच्चैरुच्चारयेत्। पश्चाज्जछतः आचार्यो
दंडवस्त्रकौपीनप्रार्थनां कृत्वा। एवं वदेत्। ओं नो
स्वामिन् लज्जानिवारणार्थं वस्त्रं गृहाण। गोसर्प ॥१३॥
निवारणार्थं दंडं गृहाणेति। आचार्यवचनं श्रु
त्वा तद्वाक्यं न लंघयेत्। कौपिनादिकं वस्त्रं स्वी
कृत्वा। परिधायाचम्यमानस संकल्पं कुर्वीत।
इति। मया दंडग्रहणं करिष्ये ने। दंडप्रार्थनां कुर्यात्।

13

वात्तेष्ठ शर्मेमे नवायत्तापंतं निवारय। विष्णुरस्त्रो
यथाचक्रं शूलं शिवकरस्य यथा। इंद्रस्य यथा वज्रं
तथा दंडं मवाघमे। दंडग्रहणं कृत्वा पश्चात् इंद्र
स्य वज्रासि। शिखां च चिंतयेद्बुधः। सप्तां मंत्रवो
यं तापत्रय विनाशार्थं गुरुतां शिखां गोपयेत्।
शिखा ज्ञानमयी यस्य तेजं यज्ञोपवीतिनः। एतं
वाक्यं मनसा चिंतयेत्। सर्वेषणा विनिर्मुक्तः स्ता
पत्रय विनाशकः॥ अंजयं सर्वभूतेभ्यो गच्छा
मि पद्मव्ययं। इति मनसा जपेत्। अंतर्ध्याने स

माचरेत्। यावद्गुरुसमीपे गच्छेत्तावत्तं हरिस्म
रणं। सम्यक्कज्ञानमयींमुद्रां कृत्वा हरिध्यान
निरामयं। सर्वदा विष्णुपरो भवेत्। धन्योहं कृत
कृत्योहं सौभाग्योहं धरातले। अहं त्वत्कृते संच ॥१६॥
सारोयास्यामिपरमव्ययं। यथाविधिवत्तु
वैदोक्तं महावाक्यं उपदेशयेत्। त्रिंशत्परान्
त्रिंशत्परान् त्रिंशत्परतः परान्। सद्यः सन्य
सनादेव नरकात्तारयेत्पितॄन्। चिद्धं उद्धरम्
षणं दद्धूरंगो सर्पकाजांतरे बाधायंत्रकरुणा

14

मयं निज गुरुं मै दत्तं तु मे दत्तमां । कौपीनं च तथा
कुलोत्तर पदं स्नानाख्य कुंडे स दत्ता येषा वृत्तिप
हि रे च कृत्ये संन्यासिनस्ते वयं ॥ ११ ॥ मठावा
क्यानंतरं स्नान संध्या वंदनादि कृत्वा मठं
प्रति गछेत् । श्रीगुरुपेत्वपयतिन त्वरणीयं
मानाभिमानौ वर्जयेत् । सर्वथा ध्यानपरो भ
वेत् । इति शौनकोक्त एकदंडी संन्यास विधि स
माप्तः ॥ संवत १७६७ पूर्विक्षे आषाढ सुदि २ रवौ लि
सविता दत्त गंगाधर नागर वडनगरा ब्राह्मण

१८।
९५

त्रि॰ काविनादत्तस्येदं

गणेश स्कंद शिवा यम विष्णु शिव

१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ ३०

अग्नी ब्रह्मा गौरी सर्प सूर्यः दुर्गा विश्वेदेवा मदन चंद्रमा पितर

तिथिदेवता

संन्यसविधी

१८

॥१५॥

15